# शिवसङ्कल्पसूक्त

वेद-शुक्ल यजुर्वेद	अध्याय संख्या- ३४	मन्त्र संख्या- १-६

ऋषि- आदित्य याज्ञवल्क्य	देवता- मनस्	छन्द- त्रिष्टुप्

**यज्जाग्रतो दूरमुदैति दैवं**

**तदु सुप्तस्य तथैवैति।**

**दूरंगमं ज्योतिषां ज्योतिरेकं**

**तन्मे मनः शिवसंकल्पमस्तु॥१॥**

पदपाठ– यत्। जाग्रतः। दूरम्। उदैतीत्युत्- ऐति। दैवम्। तत्। ॐऽइत्यूँ। सुप्तस्य। तथा। एव। एति॥ दूरङ्गममिति दूरम्-गमम्। ज्योतिषाम्। ज्योतिः। एकम्। तत्। मे। मनः। शिवसङ्कल्पमिति शिवसङ्कल्पम्। अस्तु॥

महीधरभाष्य– ऋषिर्वदति । तन्मे मनः शिवसङ्कल्पमस्तु शिवः कल्याणकारी धर्मविषयः सङ्कल्पो यस्य तत् तादृशं भवतु। मन्मनसि सदा धर्म एव भवतु न कदा चित्पापमित्यर्थः। तत्किम्। यत् मनो जाग्रतः पुरुषस्य दूरमुदैति उद्गच्छति चक्षुराद्यपेक्षया मनो दूरगामीत्यर्थः। यच्च दैवं दीव्यति प्रकाशते देवो विज्ञानात्मा तत्र भवं दैवमात्मग्राहकमित्यर्थः। मनसैव द्रष्टव्यमेतदप्रमेयं ध्रुवम् इति श्रुतेः। तत् उ। यदः स्थाने तच्छब्दः उकारश्चार्थः। यच्च मनः सुप्तस्य पुंसः तथैव इति यथा गतं तथैव पुनरागच्छति स्वापकाले सुषुवस्थायां पुनरागच्छति। यच्च दूरङ्गमं दूरात्। गच्छतीति दूरङ्गमम् खश्प्रत्ययः। अतीतानागतवर्तमानविप्रकृष्टव्यवहितपदार्थानां ग्राहकमित्यर्थः। यच्च मनो ज्योतिषां प्रकाशकानां श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्तकमित्यर्थः। प्रवर्तितान्येव श्रोत्रादीन्द्रियाणि स्वविषये प्रवर्तन्ते। आत्मा मनसा संयुज्यते मनः इन्द्रियेणेन्द्रियमर्थेनेति न्यायोक्तेर्मनः सम्बन्धमन्तरा तेषामप्रवृत्तेः। तादृशं मे मनः शान्तसङ्कल्पमस्तु।

अन्वय- जाग्रतः यत् दैवं (मनः) दूरम् उत् एति, सुप्तस्य तत् उ तथा एव एति। दूरङ्गमं ज्योतिषाम् एकः ज्योतिः मे तत् मनः शिवसङ्कल्पम् अस्तु।

पदार्थ– जाग्रतः= जागते हुए का, यत्= जो, देवम्= दिव्य प्रकाशवान्, आत्मदर्शन करने वाला, मनः= मन, दूरम्= दूर, सुप्तस्य= सोते हुए का, तत्= वह (मन), उ= ही, तथा एव= उसी प्रकार से, एति= (वापस) आता है, दूरङ्गमम्= दूरगामी, दूर जाने वाला, ज्योतिषाम्= ज्योतियों में, ज्ञानेन्द्रियों में, एकम्= अद्वितीय, ज्योतिः= प्रकाश रूप, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

अनुवाद - **जागते हुए (पुरुष) का जो दिव्य (अर्थात् दैवी शक्ति से युक्त) (मन) दूर चला जाता है; सोते हुए (पुरुष) का वही (मन) उसी प्रकार से आ जाता है; दूरगामी (तथा) ज्योतियों में अद्वितीय ज्योति स्वरूप वह मेरा मन शुभ संकल्पों वाला हो जाय।**

व्याकरण-

१. जाग्रतः- √जागृ (जागने अर्थ में) + षष्ठी एकवचन।

२. उदैति- उत् + √इण् (जाना अर्थ में) + लट्, प्रथमपुरुष एकवचन।

३. दैवम्- देव + अण् प्रथमा एकवचन।

४. दूरङ्गमम्- दूरं गच्छतीति। दूर + गम् + खश् प्रत्यय 'मुम्' आगम।

येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां
तन्मे मनः शिवसंकल्पमस्तु॥२॥

पदपाठ- येन। कर्माणि। अपसः। मनीषणः। यज्ञे। कृण्वन्ति। विदथेषु। धीराः॥ यत्। अपूर्वम्। यक्षम्। अन्तरित्यन्तः। प्रजानामिति प्र-जानाम्। तत्। मे। मनः। शिवसङ्कल्पमिति शिव-सङ्कल्पम्। अस्तु॥

म०भा०- मनीषिणः मेधाविनः यज्ञे येन मनसा सता कर्माणि कृण्वन्ति कुर्वन्ति 'कृ करणे' स्वादिः। मनः स्वास्थ्यं विना कर्माप्रवृत्तेः। केषु सत्सु। विदथेषु सत्सु विद्यन्ते ज्ञायन्ते तानि विदथानि तेषु। वेत्तेरौणादिकोऽथप्रत्ययः प्रत्ययोदात्तत्वेन मध्योदात्तं पदम् 'प्रत्ययः परश्च आद्युदात्तश्च' (पा०सू० ३.१.१-३) इति पाणिन्युक्तेः यज्ञसंबन्धिनां हविरादिपदार्थानां ज्ञानेषु सत्स्वित्यर्थः। कीदृशा मनीषिणः। अपसः अप इति कर्मनाम (निघ० २.१.१)। अपो विद्यते येषां ते अपस्विनः कर्मवन्तः 'अस्मायामेधास्रजो विनिः' (पा०सू० ५.२.१२१) इति विन्प्रत्ययः 'विन्मतोर्लुक' इतीष्ठाभावेऽपि छन्दसो विनो लुक् (पा०सू० ५.३.६५)। सदा कर्मनिष्ठा इत्यर्थः। तथा धीराः धीमन्तः धीर्विद्यते येषां से धीराः कर्मण्यण् (पा०सू० ३.२.१)। यच्च मनः अपूर्वम् न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वम् इन्द्रियेभ्यः पूर्वं मनसः सृष्टेः। यद्वा अपूर्वमनपरमबाह्यमित्युक्तेरपूर्वमात्मरूपमित्यर्थः। यच्च यक्षं यष्टुं शक्तं यज्ञम्। यजते रौणादिकः सन्प्रत्ययः 'ञ्नित्यादिर्नित्यम्' (पा०सृ० ६.१.१७) इत्याद्युदात्तं पदम्। यच्च प्रजायन्ते इति प्रजास्तासां प्राणिमात्राणामन्तः शरीरमध्ये आस्ते इतरेन्द्रियाणि बहिःष्ठानि मनस्त्वन्तरिन्द्रियमित्यर्थः। तत् तादृशं मे मनः शिवसङ्कल्पमस्त्विति व्याख्यातम्।

अन्वय- येन अपसः मनीषिणः धीराः यज्ञं विदथेषु कर्माणि कृण्वन्ति यत् प्रजानाम् अन्तः अपूर्वं यक्षं, तत् मे मनः शिवसङ्कल्पम् अस्तु।

पदार्थ– येन= जिसके द्वारा, अपसः= कर्मनिष्ठ, मनीषिणः= मनीषी लोग, मेधावी लोग, धीराः= धीर लोग, यज्ञे= यज्ञ में, विदथेषु= यज्ञ के विधिविधानों में, यज्ञ सम्बन्धी ज्ञानों में, कर्माणि कृण्वन्ति= कर्म

करते हैं, यत्= जो, प्रजानाम्= प्रजाओं के, प्राणियों के, अन्तः= अन्तर्भाग में, अपूर्वम्= अपूर्व, सर्वप्रथम, सर्वप्रधान, यक्षम्= पूज्य, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

अनुवाद- **जिसके द्वारा कर्मनिष्ठ, मेधावी (तथा) धीर लोग यज्ञ में (एवं) यज्ञ के विधि-विधानों में कर्म करते हैं, जो प्रजाओं के अन्तर्भाग में सर्वप्रथम पूज्य हैं, वह मेरा मन शुभसङ्कल्पों वाला हो जाय।**

व्याकरण-

१. कर्माणि– कर्म द्वितीया बहुवचन

२. कृण्वन्ति– √कृ + लट् प्रथमपुरुष बहुवचन, कुर्वन्ति का वैदिक रूप।

३. अपसः- अपस् + विन्।

४. यज्ञम्– √यज् + घञ् । महीधर के अनुसार- √ यज् + औणादिक् सन् प्रत्यय

डा0 धनञ्जय वासुदेव द्विवेदी

**यत्प्रज्ञानमुत चेतो धृतिश्च**

**यज्ज्योतिरन्तरमृतं प्रजासु।**

**यस्मान्न ऋते किंचन कर्म क्रियते**

**तन्मे मनः शिवसंकल्पमस्तु॥३॥**

पदपाठ– यत्। प्रज्ञानमिति प्र-ज्ञानम्। उत। चेतः। धृतिः। च। यत्। ज्योतिः। अन्तः। अमृतम्। प्रजास्विति प्र-जासु॥ यस्मात्। न। ऋते।किम्। चन। कर्म। क्रियते। तत्। मे। मनः। शिवसङ्कल्पमिति शिव-सङ्कल्पम्। अस्तु॥३॥

म०भा०- यत् मनः प्रज्ञानं विशेषेण ज्ञानजनकम् प्रकर्षेण ज्ञायते येन तत् प्रज्ञानम्। 'करणाधिकरणयोश्च' (पा०सू० ३.३.११७) इति करणे ल्युट्प्रत्ययः। उत अपि यत् मनः चेतः चेतयति सम्यक् ज्ञापयति तच्चेतः। 'चिती संज्ञाने' अस्मात् ण्यन्तादसुन्प्रत्ययः। सामान्यविशेषज्ञानजनकमित्यर्थः। यच्च मनो धृतिधैर्यरूपम्। मनस्येव धैर्योत्पत्तेर्मनसि धैर्यमुपर्यते कार्यकारणयोरभेदात्। यच्च मनः प्रजासु जनेषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणाम्। उक्तमपि पुनरुच्यते आदरार्थम्। 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १०.२८) इति यास्कोक्तेः। यच्चामृतममरणधर्मि आत्मरूपत्वात्। यस्मान्मनसः ऋते यन्मनो विना किञ्चन किमपि कर्म न क्रियते जनैः। तर्वकर्मसु प्राणिनां मनः पूर्वं प्रवृत्तेर्मनः स्वास्थ्यं विना कर्माभावादित्यर्थः। 'अन्यारादितरर्ते' (पा०सू० २.३.२९) इत्यादिना यस्यदिति ऋतेयोगे पञ्चमी। तन्मे मन इति व्याख्यातम्।

अन्वय– यत् प्रज्ञानम् उत चेतः धृतिः च यत् प्रजासु अन्तः अमृतं ज्योतिः। यस्मात् ऋते किञ्चन कर्म न क्रियते, तत् मे मनः शिवसङ्कल्पम् अस्तु।

पदार्थ- यत्= जो, प्रज्ञानम्= उत्कृष्ट ज्ञान का जनक, विशेषज्ञान का जनक, उत= और, चेतः= अपकृष्ट ज्ञान का जनक, सामान्य ज्ञान का जनक, धृतिः= धैर्य का आधार-स्वरूप, धैर्य, प्रजासु= प्राणियों में, अन्तः= वर्तमान, स्थित, (अन्तःकरण में), अमृतम्= अमर, अमृतस्वरूप, ज्योतिः= प्रकाश, यस्मात् ऋते= जिसके बिना, किञ्चन कर्म न क्रियते= कोई कर्म नहीं किया जाता, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

**अनुवाद- जो उत्कृष्ट ज्ञान का जनक है तथा (जो) अपकृष्ट (सामान्य) ज्ञान का जनक है; (जो) धैर्य का आधार-स्वरूप, प्राणियों के अन्तः (करण) में (विद्यमान) अमृत ज्योति (स्वरूप) है; जिसके बिना कोई (भी) कर्म नही किया जाता; वह मेरा मन शुभसङ्कल्पों वाला हो जाय।**

**व्याकरण-**

१. प्रज्ञानम् - प्रकर्षेण ज्ञायते येन तत् प्रज्ञानम्। प्र + √ज्ञा + ल्युट् (अन्)

२. चेत: - √चिती (संज्ञाने) + णिच् + असुन् प्रत्यय।

३. धृतिः-√धृ + क्तिन्।

४. क्रियते - √कृ + यक् + कर्मवाच्य लट्, प्रथमपुरुष एकवचन।

डॉ० धनञ्जय वासुदेव द्विवेदी

**येनेदं भूतं भुवनं भविष्य-**

**त्परिगृहीतममृतेन सर्वम्।**

**येन यज्ञस्तायते सप्तहोता**

**तन्मे मनः शिवसंकल्पमस्तु॥४॥**

पदपाठ— येन। इदम्। भूतम्। भूवनम्। भविष्यत्। परिगृहीतमिति परिगृहीतम्। अमृतेन। सर्वम्॥ येन। यज्ञः। तायते। सप्तहोतेति सप्त-होता। तत्। मे। मनः। शिवसङ्कल्पमिति शिव-सङ्कल्पम्। अस्तु॥

म०भा०- येन मनसा इदं सर्वे परिगृहीतम् परितः सर्वतो ज्ञातम्। इदं किंभूतम्। भूतकालसंबन्धि वस्तु। भुवनं भवतीति भुवनम्। भवतेः क्युप्रत्ययः वर्तमानकालसंबन्धि। भविष्यत् 'लृटः सद्वा' (पा०सू० ३.३.१४) इति शतृप्रत्ययः 'तौ सत्' (पा०सू० ३.२.१२७) इत्युक्तेः त्रिकालसंबद्धवस्तुषु मनः प्रवर्तत इत्यर्थः। श्रोत्रादीनि तु प्रत्यक्षमेव गृह्णन्ति। कीदृशेन येन। अमृतेन शाश्वतेन। मुक्तिपर्यन्तं श्रोत्रादीनि नश्यान्त मनस्त्वनश्वरमित्यर्थः। येनं च मनसा यज्ञोऽग्निष्टोमादिः तायते विस्तार्यते। 'तनोतेर्यकि' (पा० सू० ६.४.४४) इत्याकारः। कीदृशी यज्ञः। सप्तहोता सप्तहोतारो देवानामाह्वातारो होतृमैत्रावरुणादयो यत्र स सप्तहोता। अग्निष्टोमे सप्तहोतारो भवन्ति। तन्मे मन इति व्याख्यातम्।

अन्वय– येन अमृतेन (मनसा) इदं भूतं भुवनं भविष्यत् सर्वं परिगृहीतम्। येन सप्तहोता यज्ञः तायते तत् मे मनः शिवसङ्कल्पम् अस्तु।

पदार्थ- येन अमृतेन= जिस शाश्वत् द्वारा, जिस अविनाशी के द्वारा, भूतम्= भूतकालीन, भुवनम्= वर्तमानकालीन, भविष्यत्= भविष्यत्कालीन, सर्वम्=सब कुछ, परिगृहीतम्= भली-भाँति ग्रहण किया गया है, ज्ञात किया जाना, येन= जिसके द्वारा, सप्तहोता= सात होताओं वाला, यज्ञः= यज्ञ, तायते= सम्पादित किया जाता है, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

**अनुवाद– जिस शाश्वत् (मन) के द्वारा भूतकालीन, वर्तमानकालीन एवं भविष्यत्कालीन सब कुछ भली-भाँति ज्ञात किया जाता है, जिसके द्वारा सात होताओं (होतृ, पोतृ, मैत्रावरुण, ग्रावस्तुत, ब्राह्मणाच्छंदसी, अच्छावाक, अग्नीद) से युक्त यज्ञ सम्पादित किया जाता है, वह मेरा मन शुभ सङ्कल्पों वाला हो जाय।**

१. भुवनम् - √भू + क्युः (अन्।

२. तायते - √तन् +यक् + लट्, प्रथमपुरुष।

३. भविष्यत् - √भू + लृटः शतृ।

४. सप्तहोता- सप्त होतारो यस्मिन् सः सप्तहोता। सात होता ये हैं- होतृ, पोतृ, मैत्रावरुण, ग्रावरुण, ब्राह्मणाच्छंदसी, अच्छावाक् एवं अग्नीद्।

**यस्मि॒न्नृच॒: साम॒यजूंषि यस्मि॒-**

**न्प्रति॑ष्ठिता रथाभावि॑वा॒राः।**

**यस्मिं॑श्चि॒त्तंस॒र्व॒मोतं॑ प्र॒जाना॑ं**

**तन्मे॒ मन॑ शि॒वसंकल्पमस्तु॥५॥**

पदपाठ-यस्मि॑न्। ऋ॒चः॑। साम॑। यजूंषि। यस्मि॑न्। प्रति॑ष्ठिता। प्रति॑स्थि॒तेति॒ प्रति॑ स्थिता। र॒थ॒नाभावि॒वेति॑-रथनाभौ। इ॑व। अ॒राः॥ यस्मि॑न्। चि॒तम्। सर्वं॑म्। ओत॒मित्या-उ॑तम् प्र॒जाना॒मिति॑ प्र॒-जना॑म्। तत्। मे। मनः॑। शि॒वस॑ङ्कल्प॒मिति॑ शि॒व-स॑ङ्कल्पम्। अ॒स्तु॥

म०भा०- यस्मिन् मनसि ऋचः प्रतिष्ठिताः। यस्मिन् साम सामानि प्रतिष्ठितानि। यस्मिन् यजूंषि प्रतिष्ठितानि। मनसः स्वास्थ्ये एव वेदत्रयीस्फूर्तेर्मनसि शब्दमात्रस्य प्रतिष्ठितत्वम् 'अनामयं हि सोम्य मनः' इति छान्दोग्ये मनस एव स्वास्थ्ये। वेदोच्चारणशक्तिः प्रतिपादिता। तत्र दृष्टान्तः। रथनाभौ अराः इव। यथा अराः रथचक्रनाभौ मध्ये प्रतिष्ठितास्तद्वच्छब्दजालं मनसि। किञ्च प्रजानां सर्वं चित्तं ज्ञानम् सर्वपदार्थविषयिज्ञानं यस्मिन् मनसि ओतं निक्षिप्तं तन्तुसन्ततिः पटे इव सर्वं ज्ञानं मनसि निहितम्। मनः स्वास्थ्य एव ज्ञानोत्पत्तिर्मनोवैयग्र्ये च ज्ञानाभावः। तन्मे मम मनः शिवसङ्कल्पं शान्तव्यापारमस्तु।।

अन्वय– यस्मिन् ऋचः यस्मिन् साम यजूंषि रथनाभौ अराः इव प्रतिष्ठिताः यस्मिन् प्रजानां सर्व चित्तम् ओतं तत् मे मनः शिवसङ्कल्पम् अस्तु।

पदार्थ- यस्मिन्= जिस (मन) के अन्तर्गत, ऋचः= ऋचाएँ, ऋग्वेद के मन्त्र, साम= सामवेद के मन्त्र, यजूंषि= यजुर्वेद के मन्त्र, रथनाभौ= रथ की नाभि में, अराः इव= अरे की भाँति, प्रतिष्ठिता:= प्रतिष्ठित हैं, प्रजानाम्= प्राणियों का, सर्वम्= सम्पूर्ण, चित्तम्= चित्त, ज्ञान, ओतम्= अनुस्यूत है, बिंधा हुआ है, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

अनुवाद - **जिस (मन) के अन्तर्गत ऋग्वेद के मन्त्र, जिसके अन्तर्गत सामवेद के मन्त्र एवं यजुर्वेद के मन्त्र प्रतिष्ठित हैं, जिसमें प्राणियों का सम्पूर्ण (अर्थात् सर्व पदार्थ-विषयक) ज्ञान अनुस्यूत है, वह मेरा मन शुभसङ्कल्पों वाला हो जाय।**

व्याकरण-

१. प्रतिष्ठिताः – प्रति + √स्था + क्त, प्रथमा बहुवचन

२. ओतम्- आ + √वेञ् ( तन्तुसन्ताने) + क्त प्रत्यय

डा0 धनञ्जय वासुदेव द्विवेदी

सुषारथिरश्वानिव यन्मनुष्या-

नेनीयतेऽभीशुभिर्वाजिन इव।

हृत्प्रतिष्ठं यदजिरं जविष्ठं

तन्मे मनः शिवसंकल्पमस्तु॥६॥

पदपाठ- सुषारथिः। सुसारथिरिति सु- सारथिः। अश्वानिवेत्यश्वान् इव। यत्। मनुष्यान्। नेनीयते। अभीशुभिरित्यभीशु-भिः। वाजिनऽडइवेति-वाजिनः-इव॥ हृत्प्रतिस्थमिति हृत्-प्रतिस्थम्। यत्। अजिरम्। जविष्ठम्। तत्। मे। मनः। शिवसंङ्कल्पमिति शिव-संङ्कल्पम्। अस्तु॥६॥

म०भा०- यत् मनो मनुष्यान्नरान्नेनीयते अत्यर्थमितस्ततो नयति। नयतेः क्रियासमभिहारे यङ्। मनः प्रेरिता एव प्राणिनः प्रवर्तन्ते। मनुष्यग्रहणं प्राणिमात्रोपलक्षकम्। तत्र दृष्टान्तः। सुसारथिः अश्वानिव शोभनः सारथिर्यन्ता यथा कशया अश्वान् नेनीयते। द्वितीयो दृष्टान्तः। अभीशुभिर्वाचिन इव यथा सुसारथिरभीशुभिः प्रग्रहैः वाजिनोऽश्वान्नेनीयत इत्यनुषङ्गः। रश्मिभिर्नियच्छतीत्यर्थः। उपमाद्वयम्। प्रथमायां नयनं द्वितीयायां नियमनम्। तथा मनः प्रवर्तयति नियच्छति च नरानित्यर्थः। यच्च मनः हृत्प्रतिष्ठं हृदि प्रतिष्ठा स्थितिर्यस्य तत् हृद्येव मन उपलभ्यते। यच्च मनः अजिरं जरारहितम् बाल्ययौवनस्थविरेषु मनसस्तदवस्थत्वात्। यच्च जविष्ठम् अतिजववद्वेगवत् जविष्ठम् 'न वै वातात्किञ्चनाशीयोऽस्ति न मनसः किञ्चनाशीयोऽस्ति' इति श्रुतेः। तन्म इत्युक्तम्।

अन्वय– यत् (मनः) मनुष्यान् सुषारथिः अश्वान् इव नेनीयते अभीषुभिवाजिन इव (मनुष्यान् कर्मषु प्रेरयति) यत् हृत्प्रतिष्ठं अजिरं जविष्ठं तत् मे मनः शिवसङ्कल्पम् अस्तु।

पदार्थ- यत्=जो, मनुष्यान्= मनुष्यों को, सुषारथिः= अच्छा (सुयोग्य), अश्वान् इव= घोड़ों के समान, नेनीयते= ले जाता है, अभीषुभिः= लगामों के से, वाजिनः इव= घोड़ों के समान, यत्= जो, हत्प्रतिष्ठं= हृदयस्थ, हृदय स्थित, अजिरं= जरारहित, वृद्धावस्था से रहित, जविष्ठम्= अत्यधिक वेग शाली, मे=मेरा, तत् मनः= वह मन, शिवसङ्कल्पम्= शुभ सङ्कल्पों वाला, अस्तु= हो जाय।

अनुवाद– जो (मन) मनुष्यों को उसी प्रकार (ले जाता है) जैसे अच्छा (योग्य) सारथि अश्वों को ले जाता है; लगामों से घोड़ो को जिस प्रकार ले जाया जाता है उसी प्रकार (जो मन मनुष्यों को कर्मों में प्रेरित करता है), जो हृदयस्थ, जरारहित एवं अतिशय वेगशाली है वह मेरा मन शुभ संकल्पों वाला हो जाय।

व्याकरण-

१. सुषारथिः - ऋ ॠ, इ, ई, उ, ऊ, ए, ऐ, ओ तथा औ; ये दश स्वर 'नामिन्' कहलाते हैं- 'ऋकारादयो दश नामिनः स्वराः' (ऋ. प्रा. १/६५)। इनके बाद आने वाला सकार षकार में परिवर्तित हो जाता है। इस प्रकार सु + सारथिः = सुषारथिः बन गया है।

२. नेनीयते - √नी + यङ् क्रियासमभिहारे + लट् प्रथमपुरुष एकवचन।

३. अभीषुभिः- अभि + ईष् गतौ + उः + तृतीया, बहुवचन।

४. वाजिनः- अवश्यं वजन्ति इति वाजिनः, √वज् + णिनि, द्वितीया बहुवचन।

५. जविष्ठम् - √जु + इष्ठन् प्रत्यय

६. प्रतिष्ठम् – प्रति + √स्था (गतिनिवृत्तौ) + कः।

डा० धनञ्जय वासुदेव द्विवेदी